
# १६. समानमस्तु भोजनम् । (चतुर्थः घटकः)



बालकृष्णः गोकुले गोपालनं करोति स्म । प्रतिदिनं सः वयस्यैः सह वनं गच्छति स्म । गोकुलस्थाः बालगोपालाः वासुदेवेन सह आसायं हिण्डन्ते स्म । मध्याह्ने ते सर्वे स्वगृहेभ्यः आनीतानि खाद्यवस्तूनि एकत्र उपविश्य खादन्ति स्म ।

एकस्मिन् दिने भोजनवेलायां सर्वे गोपाः कृष्णं परितः उपाविशन् । देवकीनन्दनः गोपबालान् अपृच्छत् । ''अद्य भोजनार्थं किम् आनीतम् ?'' इति । तदा प्रथमः अवदत्, ''मम समीपे दध्योदनं वर्तते ।'' अपरः अभाषत, ''मम समीपे पृथुकाः ।'' एवमेव सर्वे ''अपूपाः, लड्डुकाः, वटकाः, मोदकाः आनीताः'' इति अवदन्। तदा कृष्णः अवदत्, ''अयि मित्राणि, वयम् एतेषां खाद्यपदार्थानां मिश्रणं कुर्मः ।'' सर्वे गोपालाः आनन्देन कृष्णाय स्वं स्वं खाद्यम् अयच्छन् । कृष्णः स्वयमेव पदार्थानां मिश्रणम् अकरोत् । सर्वेभ्यः च तद् मिश्रणं पर्यवेषयत् । तद् अपूर्वं स्वादिष्टं मिश्रणं सर्वेभ्यः अतीव अरोचत । यतः तस्मिन् मिश्रणे न केवलं खाद्यपदार्थाः अपि तु स्नेहश्च मिश्रितः । तदा गोपनायकः बालकृष्णः अवदत्, ''इतःपरं वयं सर्वे सम्मिल्य एव भोजनं कुर्मः । अयि मित्राणि, अस्माकं मनांसि समानानि, विचाराः समानाः, भोजनमपि समानमस्तु ।''

## भाषाभ्यासः

१. **एकवाक्येन उत्तरं लिखत ।**

१. गोपबालाः भोजनाय किं किम् आनयन्?

२. कृष्णः किं किं समानमिति वदति?

३. कृष्णः खाद्यपदार्थे किं मिश्रयति?

४. पाठे प्रयुक्तानि कृष्णस्य नामानि लिखत ।

२. **प्रश्ननिर्माणं कुरुत ।**

१. गोकुलस्थाः बालगोपालाः <u>वासुदेवेन</u> सह आसायं हिण्डन्ते स्म ।

२. बालकृष्णः गोकुले <u>गोपालनं</u> करोति स्म ।

३. पृथक् कुरुत ।

| नाम | सर्वनाम | विशेषणम् | क्रियापदम् |
| --- | --- | --- | --- |
| | | | |

(गोकुलस्था:, कृष्ण:, अकरोत्, किम्, मम, मोदका:, उपाविशन्, समाना:)

४. समूहेतरपदं चिनुत ।

१. बालकृष्ण:, देवकीनन्दन:, चन्द्रशेखर:, गोपनायक:

२. अवदत्, अभणत्, अगदत्, अकरोत्

५. विरुद्धार्थशब्दान् मञ्जूषात: चिनुत ।

१. मित्राणि × 	३. स्वादिष्ठम् ×

२. समीपे × 	४. समानानि ×

(रुचिहीनम्, विविधानि, अरय:, दूरे)

६. लट्रूपाणि प्रयुज्य कथां पुन: वदत/लिखत ।

७. सहभोजनस्य स्वीयम् अनुभवं माध्यमभाषया लिखत ।

८. कृष्णस्य अन्यानि विविधानि नामानि अन्विष्यत लिखत च ।

९. युष्माकं प्रियभोजनपदार्थानां सूचिं संस्कृतभाषया कुरुत ।

I8XCSF

**लट्लकारस्य पुरत: 'स्म' इति अव्ययस्य प्रयोगेन भूतकालिक: अर्थ: भवति ।**

**उदा. स: फलं खादति स्म = स: फलम् अखादत् ।**

**बालगोपाला: वासुदेवेन सह हिण्डन्ते स्म = बालगोपाला: वासुदेवेन सह अहिण्डन्त ।**

**गोपनायक: बालकृष्ण: वदति स्म = गोपनायक: बालकृष्ण: अवदत् ।**

### वदत संस्कृतम् ।

१. सुप्रभातम् ।
२. शुभरात्रि: ।
३. नमो नम: ।
४. धन्यवाद: ।
५. स्वागतम् ।
६. कृपया ।
७. अस्तु ।
८.शोभनम्/उत्तमम्।



### शुभाशया: ।

१. नववर्षस्य शुभाशया: ।
२. सफलतायै अभिनन्दनम्।
३. कार्यक्रम: सफल: भवतु।
४. शुभास्ते पन्थान: सन्तु ।
५. परीक्षायै शुभाशया: ।
६. जीवेत् शरद: शतम् ।
७.दीपावली मङ्गलमातनोतु।
८. शुभं भवतु ।

